# MASTER OF ARTS EXAMINATION, 2019

(2nd Year, 4th Semester)

**SANSKRIT**

**Course : XVII / E**

## [ Select Inscriptions of Contemporary Gupta and Post-Gupta Rulers ]

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः। तेषु **द्वौ** आङ्गलभाषया **त्रयश्च** सुरगिरा देवनागरीलिप्या लेखनीयाः। 1×5=5

(क) धर्मपालदेवस्य खालिमपुरताम्रशासनं केनोत्कीर्णम्? तस्य शिल्पिनः पितुः पितामहस्य च नामनी उल्लिख्येताम्।

(ख) द्वितीयपुलकेशिन ऐहोल्-प्रशस्तौ कीर्तिवर्मा केषां कालरात्रिरित्युच्यते?

(ग) निधनपुरताम्रशासनं कस्मात् स्थानात् प्रचारितम्? तस्मिन् शासने श्रीमृगाङ्क इति कस्य नामान्तरम्?

(घ) देवपाडाभिलेखस्य कविः शिल्पी च नामग्राहम् उल्लेखमर्हतः।

(ङ) देवपालदेवस्य नालन्दाशासने दूतकः कः? असौ कस्य स्थानस्याधिपतिरासीत्?

(च) भोजवर्मणो बेलावताम्रशासनानुसारं वर्मनृपाणामादिभूमिः कुत्रासीत्? ते राजानः कस्मिन् पौराणिकान्वये जात इति तस्मिन् शासने उच्यते?

[*Turn over*]

(छ) वल्लालसेनस्य नैहाटिशासनेन को ग्रामो दीयते? स च ग्रामः कस्यां भुक्तौ कस्मिंश्च मण्डलेऽवस्थित आसीत्?

(ज) विजयसेनस्य पितरौ उल्लिख्येताम्। देवपाडाप्रशस्त्यां कस्य अधिष्ठानस्य निर्माणमुच्यते?

२। अधोलिखितेषु **पञ्च** प्रश्नाः समाधेयाः। 5×5=25

(क) देवपाडाप्रशस्तिमाश्रित्य विजयसेनस्य सामरिककीर्तयो वर्णनीयाः।

(ख) ''मात्स्यन्यायमपोहितुं प्रकृतिभिर्लक्ष्म्याः करं ग्राहितः'' — सप्रसङ्गं व्याख्या कार्या।

(ग) देवपालदेवस्य नालन्दाताम्रशासनेन केभ्यः किमर्थं ग्रामा दीयन्ते? कस्यानुरोधाद् ग्रामा दत्ताः? तस्यानुरोधकारिणः परिचयः शासनानुसारं दीयताम्। ग्रामाणां नामोल्लेखपुरःसरं भौगोलिकावस्थानानि निर्दिश्यन्ताम्। 1½+½+1½+1½=5

(घ) ऐहोल-प्रशस्तिदिशा चालुक्यान्वयो वर्ण्यताम्। केन कविना रचितेयम्? असौ कविः आत्मानं कथं स्तौति? अस्याभिलेखस्य कालः कथमुल्लिख्यते? ख्रिस्टाब्देन असौ कालः परिणमनीयः। कवेः धर्मविषये अस्याः प्रशस्तेः किमुप लभ्यते? केन कारणेन इयं प्रशस्तिः रचिता?

1+½+1+1+½+½+½=5

(ङ) वल्लालसेनस्य नैहाटिशासनं कस्मात् स्थानात् प्रचारितम्? वल्लालेसनस्य उपाधयः शासनानुसारमुल्लिख्यन्ताम्। इदं शासनं किमुपलक्ष्य प्रचारितम्? दानप्रापकस्य परिचयः शासनानुसारं प्रदेयम्। क आसीदस्य दूतकः? कस्मिन् समये शासनं प्रचारितमिति तस्मिन् शासने उच्यते?

½+1+1½+1+½+½=5

(च) भौमनरकवंशस्य ईदृशनामकरणं कुतः इति निधनपुरशासनाद् अव गम्यते ? अनेन शासनेन यद्दानं कृतं तेन दानेन संबद्धा राजपुरुषा सपरिचयम् उल्लेख्याः । ''तस्मान्नैतानि कूटानि'' — केन कारणेन उक्तमिदम् ? 1+2+2=5

(छ) भोजवर्मणो बेलावशासनमाश्रित्य जातवर्मणः कीर्तयो वर्णनीयाः ।

---